उपसर्गवर्गः

श्रीमद्देवभट्टाचार्यविरचितः

सम्पादक

अमरनाथ पाण्डेय

प्रकाशक
अमरनाथ पाण्डेय
काशी विद्यापीठ, वाराणसी

प्रथम संस्करण
मार्च, १९६८
मूल्य : [redacted] 25)=

मुद्रक
अमलकुमार बसु
इंडियन प्रेस (प्राइवेट) लिमिटेड
वाराणसी-शाखा

शब्दप्रभाकिरणमण्डलमण्डनाङ्कं
सारस्वतं किमपि धाम महर्षिजुष्टम् ।
औज्ज्वल्यलालितमफल्गुवचोनिधानैः
सम्भूषितं मधुमयं रुचिरं चकास्ति ॥

अमरनाथ पाण्डेय~

प्रकाशक
अमरनाथ पाण्डेय
काशी विद्यापीठ, वाराणसी

प्रथम संस्करण
मार्च, १९६८
मूल्य : [redacted] 25)=

मुद्रक
अमलकुमार बसु
इंडियन प्रेस (प्राइवेट) लिमिटेड
वाराणसी-शाखा

मानसिकी

मैंने श्री महादेव भट्टाचार्य द्वारा विरचित 'उपसर्गवर्गः' का यह संस्करण आर्षमुद्राशाला, विशाखपट्टण से १९१३ ई० में प्रकाशित संस्करण[1] तथा वाराणसेय संस्कृत विश्वविद्यालय में सुरक्षित एक पाण्डुलिपि[2] की सहायता से तैयार किया है। आर्षमुद्राशाला के संस्करण में दो श्लोकों (६६, ६७) का पाठ खण्डित है—

"विजयो विक्र [मे]'.....।
.....॥
.....विश्लेषः परिरम्भवियोगयोः।"

मैंने इसे वाराणसेय संस्कृत विश्वविद्यालय की पाण्डुलिपि से ठीक किया है। अन्य स्थलों पर भी पाठ ठीक करने में उक्त पाण्डुलिपि उपयोगी सिद्ध हुई है। कुछ ऐसे भी स्थल हैं, जहाँ दोनों के पाठ त्रुटिपूर्ण हैं। वहाँ मैंने अपनी मति के अनुकूल पाठ ठीक किया है।

इस कृति के अन्तिम श्लोक से ज्ञात होता है कि इसकी रचना संवत् (?) १८४३ में हुई थी—

'गुणाश्च वेदाश्च ततो महेभाः
कलानिधिश्चेति च वत्सराङ्काः।'

---

१. इसके लिए संकेत-चिह्न 'अ' का प्रयोग किया गया है।

२. पाण्डुलिपि-सम्बन्धी विवरण इस प्रकार है—
पत्रसंख्या—७
आकार—१२·१" × ६·५"
पंक्ति-संख्या (प्रत्येक पृष्ठ में)—११
अक्षर-संख्या (प्रत्येक पंक्ति में)—३६
लिपि—देवनागरी
इसके लिए संकेत-चिह्न 'इ' है।

कोशकार की व्याख्या कुछ स्थलों पर रहस्य का उद्घाटन करती है। 'उद्दोह' शब्द अन्य कोशों (अमरकोश, हलायुध, वैजयन्ती, वाचस्पत्यम्, शब्दकल्पद्रुम, मानियर विलियम्सकृत कोश, आप्टेविरचित कोश आदि) में नहीं मिलता। इसमें उद्दोह का अर्थ दिया गया है—जलाशय से जल निकालना। उद्दोह से ही 'उदहना' शब्द निकला है।

इस रचना में दो-एक स्थलों पर अप्रामाणिक प्रसङ्ग भी उपलब्ध होते हैं। 'अनुबोधः पत्रलेखा' (श्लोक १३०) में अनुबोध का अर्थ पत्रलेखा दिया गया है। अनुबोध का अर्थ है—निकली हुई गन्ध को पुनः लाना। इसका अर्थ पत्रलेखा नहीं है। 'अभिघातस्तु शस्त्राद्यैः प्रहारस्तु उपस्थितः।' (श्लोक १३३) में सन्धि नहीं की गयी है।

उपसर्गों के सम्बन्ध में यह कार्य श्लाघनीय है।

अमरनाथ पाण्डेय

उपसर्गवर्गः

सरस्वती शब्दजलप्रवाहा
नानार्थवीचीरुचिरा विभाति ।
निष्णातचेताः कविकर्मदक्षो
यस्यां भवेन्मन्दमतिर्नरोऽपि ॥ १ ॥
एकेन युग्मेन कृशानुभिर्वा
स्वार्थं परित्यज्य परार्थभाजः ।
शब्दा इति स्युर्विंशदार्थबोधा
विधीयतेऽसावुपसर्गवर्गः ॥ २ ॥
स्वतोऽर्थः सृज्यतेऽपूर्वः स हि येनोपसर्गकः ।
केवलं धारणार्थस्य धातोरर्थाः पृथग्यथा ॥ ३ ॥
उपधानं तूपबर्हे समाधानं मनःस्थितौ ।
सन्धानमुभयोर्योग आसवादिकृतावपि ॥ ४ ॥
अपिधानं पिधानं च द्वयमाच्छादने स्मृतम् ।
प्रधानं प्रकृतौ मन्त्रिश्रेष्ठयोश्चाथ नामनि ॥ ५ ॥
अभिधानमधोवस्त्रे परिधानं विधानकम् ।
कृत्ये सद्वस्तुसम्पूर्णे निधानं वस्तुनि स्मृतम् ॥ ६ ॥
आधानं स्थापने वाच्यं धारणार्थोद्भवा अमी ।
प्रहारस्ताडने भोज्य आहारः कर्षणे मतः ॥ ७ ॥

संहारः क्रीडने वाच्यो विहारः परिवर्जने ।
परिहारोऽथ मग्नस्योद्धारो निःसारणे स्मृतः ॥ ८ ॥
उपायने तूपहारो हरणार्थोद्भवा इमे ।
विधौ प्रकार आकारः स्वरूपे योग्यतार्थकः ॥ ९ ॥
अधिकारः समुद्दिष्ट उपकारो हितं भवेत् ।
अपकारोऽहितं ख्यातमनुकारो विडम्बनम् ॥१०॥
रूपस्वभाववैजात्ये विकारो वरणार्थकः ।
प्राकारः करणार्थस्य धातोः शब्दा उदाहृताः ॥११॥
आकरः खनिपर्यायः सङ्करो वर्णभेदजे ।
उदितः प्रकरः पुञ्जे समूहे निकरोत्करौ ॥१२॥
परिवारे परिकरस्तथैव कथितो बुधैः ।
उत्पत्तौ प्रभवो भङ्गे पराभव उपस्थितौ ॥१३॥
सम्भवोऽनुभवः साक्षात्कारे विभव ऊर्जिते ।
उद्भवोऽङ्कुरभावेऽनादरे परिभवः स्मृतः ॥१४॥
तिरस्कृतावभिभवः सत्तार्थजनिता इमे ।
प्रमाणपरिमाणे स्तः स्वार्थवाचकशाक्तिके ॥१५॥
अपमानावमानौ तु तिरस्कारार्थवाचकौ ।
सम्मानः सत्कृतावुक्तेऽनुमानं तर्क इष्यते ॥१६॥
निर्माणं रचना व्योम्नो विमानं यानमुच्यते ।
उन्मानं द्रोणपर्यायोऽभिमानं गर्वसंज्ञकः ॥१७॥
प्रतिमानं प्रतिच्छायोपमानं साम्यमीरितम् ।
धातोर्मानार्थकस्योक्ताः शब्दा अर्थविशारदैः ॥१८॥

सन्देशो वाचिके[1] सद्भिरपदेशो मिषे स्मृतः ।
निदेशः शासने मानभेदे प्रादेश ईरितः ॥१९॥
निर्देशः कथने त्वाज्ञायामादेशः प्रकीर्तितः ।
उद्देशः स्यात्परिकर उपदेशो गुरूक्तिषु ॥२०॥
शब्दा दानार्थसम्भूता विनिर्णीताः पुरातनैः ।
प्रणयःप्रेमसन्दोहे[2]ऽपनयो[3]ऽनय उच्यते ॥२१॥
सान्त्वनेऽनुनयो निर्धारणे निर्णय इष्यते ।
विनयः प्रश्रये नृत्यभावेऽभिनयसंज्ञकः ॥२२॥
मौञ्जीविधावुपनयः प्राज्ञैः परिणयो मतः ।
विवाहे प्रापणार्थस्य धातोः शब्दा इमे स्मृताः ॥२३॥
पुंश्चलीकर्मणि ख्यातोऽभिसारः शब्दकोविदैः ।
संसारो जन्ममरणे प्रसारो विस्तृतौ मतः ॥२४॥
निःसारः साररहितेऽपसारो दूरसर्पणे ।
धारासम्पात आसारोऽतिसारो रेचनामये ॥२५॥
प्रसरो विस्तरे ख्यातो विसरो वृन्दवाचकः ।
विडम्ब्यनुसरः प्रोक्तः समयेऽवसरः स्मृतः ॥२६॥
गत्यर्थसम्भवा शब्दा निर्णीता निपुणैरिति ।
आयो द्रव्यागमेऽपायव्यौ तु नाशने मतौ ॥२७॥
गदितश्चाथ समयोऽनेह[4]स्सङ्केतयोर्बुधैः ।
अन्वयो वंशसम्बन्धे निरयो दुर्गतौ मतः ॥२८॥

---

१. अ, इ—'वाचके' । २. अ—'०सन्देशे' ।
३. अ, इ—'०पनेयो' । ४. अ, इ—'०नेहसंकेत०' ।

उपाय उपचर्यायां विश्रम्भे प्रत्ययः स्मृतः ।
शब्दशास्त्रप्रवीणैश्च गदितः स्वाद्यणादिषु ॥२९॥

समुदायः समुदयः समवायो गणार्थकाः ।
पर्यायोऽपरनाम्नि स्यात्तथा नाशेऽत्ययाप्ययौ ॥३०॥

उदयः प्रकटीभावे गत्यर्थेत्था अमी स्मृताः ।
परेतः प्राप्तपञ्चत्वे प्रेतश्चापीदृशः स्मृतः ॥३१॥

अपेतो विगते युक्ते समेतान्वितनामकौ ।
दारिद्र्ये दुरितं वीतं त्वसारे हस्तिवाजिनि ॥३२॥

नीतं सम्प्रापिते दीप्ते प्राकट्य उदितः स्मृतः ।
प्रतीतो निश्चयवति व्यतीतस्तु गते भवेत् ॥३३॥

युक्ते परीतः सम्प्राप्त उपेतः प्राज्ञसम्मतः ।
अधीतस्तु कृताभ्यासे शब्दा गत्यर्थसम्भवाः ॥३४॥

प्रस्तावे तु प्रसङ्गः स्यान्निःसङ्गोऽबद्धचेतसि[1] ।
निषङ्ग इषुधौ क्रोड उत्सङ्गः समुदाहृतः ॥३५॥

अभिषङ्गः पराभूतावनुषङ्गस्तु सङ्गतौ ।
योगार्थसम्भवाः शब्दा विद्वद्भिः प्रकटीकृता ॥३६॥

उच्चारो[2] मेहने ख्यातोऽभिचारःकार्मणे[3] स्मृतः ।
परिचारस्तु भृत्ये स्यादुपचारोऽर्चने विधौ ॥३७॥

---

१. इ—'निस्सङ्गो बद्धचेतसि' ।

२. उच्चार का अर्थ मेहन (मूत्र) दिया गया है । अन्य कोशों में उच्चार का यह अर्थ नहीं उपलब्ध होता । उच्चार का अर्थ है—विष्ठा । द्रष्टव्य—

'..... उच्चारावस्करौ शमलं शकृत् ।
पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ ॥'

अमरकोश, २/६/६७-६८

३. इ—'कर्मणे' ।

अतिचारस्तु खेटस्याकाले राश्यन्तरं गते ।
प्रचारः प्रथितव्याप्तावपचारो विलुम्पने ॥३८॥
सञ्चारश्चेतसो भ्रान्तौ विचारः स्याद्विमर्शने ।
श्रुतिस्मृत्युदिते धर्म आचारः सम्प्रकीर्तितः ॥३९॥
गत्यर्थप्रकृतेर्जाताः शब्दा वैशद्यमागताः ।
संशयो द्वापरे ख्यात आशयोऽन्तर्गते हृदः ॥४०॥
कोष्ठे चानुशयः पश्चात्तापेऽथातिशयो भरे ।
रुजां स्वरूपविज्ञानहेतावुपशयः स्मृतः ॥४१॥
स्वप्नार्थधातुसम्भूताः शब्दाः ख्यातिमुपागताः ।
प्रग्रहोपग्रहौ कारावन्धने संस्मृतौ बुधैः ॥४२॥
सङ्ग्रहः सञ्चये वाच्यः कथितस्त्वाग्रहो हठे ।
वर्षारोधेऽवग्रहः स्यात् पुनः स्तम्बेरमालिके ॥४३॥
केतावुपग्रहः प्रोक्तो विग्रहो वैरवर्ष्मणोः ।
अनुग्रहः कृपाभावे घाते निग्रह ईरितः ॥४४॥
प्रतिग्रहस्तु दानाङ्गीकारे ज्ञेयः परिग्रहः ।
दारेष्विति विशेषार्था उपादानार्थसम्भवाः ॥४५॥
संसर्गः स्पर्शने भावे निसर्गः स्वस्थ उच्यते ।
विसर्गः सर्गवैकृत्य[1] उत्सर्गः प्रतिमोक्षणे ॥४६॥
प्रतिसर्गः सृष्टिविधावुपसर्ग उपप्लवे ।
प्रादिष्वपीरिताः प्राज्ञैः सर्जनार्थोद्भवा अमी ॥४७॥

---

१. अ, इ—'सरवैकृत्य' ।

प्रसादः परमामोदे विषादस्तद्विपर्यये ।
अवसादः कृशीभावे निषादो भिल्लनामनि ॥४८॥

प्रसन्नः स्यात्प्रमुदिते विषण्णः क्लिष्टचेतसि ।
अवसन्नस्तनुतरे निषण्णः संस्मृतः स्थिते ॥४९॥

शब्दा एते विशरणावसादनगतेर्भवाः ।
प्रक्रमानुक्रमौ स्यातां क्रमार्थावेव सङ्क्रमः ॥५०॥

रवे राश्यन्तरगते विपर्यासे त्वपक्रमः ।
पराक्रमो विक्रमश्च द्वौ स्यातां पुरुषार्थकौ ॥५१॥

निष्क्रमो निर्गमे ख्यात आक्रमः परिवेष्टने ।
उल्लङ्घनेऽतिक्रमः स्यादुत्क्रमो मरणे स्मृतः ॥५२॥

प्रदक्षिणार्थकः प्रोक्तः परिक्रम उपक्रमः ।
आरम्भे पादविक्षेपस्वार्थधातोरिति स्मृताः ॥५३॥

विलासो नर्मणि ख्यात उल्लासो मुदि सम्मतः ।
मनोरथोऽभिलाषः स्यात् परिलासस्तु मण्डने ॥५४॥

दीप्त्यर्थसम्भवा एते शब्दाः प्रोक्ताश्च सूरिभिः ।
प्रकाशस्तेजसो धर्मेऽवकाशो महदन्तरे ॥५५॥

स्फुटीभावेषु मनसो विकाशः सम्प्रकीर्तितः ।
प्रतीकाशश्च नीकाशः सङ्काशः सदृशार्थकाः ॥५६॥

आकाशो वियति ज्ञेयो दीप्त्यर्थप्रभवाः स्मृताः ।
सम्प्रदानं चतुर्थ्यर्थेऽपादानं पञ्चमीगते ॥५७॥

आदानं ग्रहणे हेतौ निदानं परिकीर्तितम् ।
दानार्थसम्भवाः शब्दाश्चत्वारः समुदाहृताः ॥५८॥

सङ्गमो मिलने वेदशास्त्रयोर्निगमागमौ ।
विगमापगमौ द्वौ तु शब्दौ राहित्यवाचकौ ॥५९॥

निर्गमो निष्क्रमे ख्यातोऽवगमोऽधिगतौ बुधैः ।
बोधोऽभिगम उद्दिष्टः साम्मुख्ये महतां गते ॥६०॥

उद्गमोपगमौ भावे प्राप्तौ च क्रमशः स्मृतौ ।
सुगमो दुर्गमश्चेति शक्याशक्यगते मतौ ॥६१॥

गत्यर्थसम्भवा एते शब्दा ज्ञेया विचक्षणैः ।
प्रपन्नः शरणं प्राप्ते सम्पन्नो धनपूरिते ॥६२॥

उत्पन्नोऽपि च निष्पन्नो द्वावप्येतौ समार्थकौ ।
आपन्नश्च विपन्नश्च विपत्तिग्रस्त ईरितौ ॥६३॥

प्रतिपन्नोपपन्नाभिपन्नाः प्राप्त्यर्थवाचकाः ।
गत्यर्थसम्भवाः शब्दा विद्वद्भिः प्रकटीकृता ॥६४॥

विजयो विक्रमफले तन्नाशे तु पराजयः ।
जयार्थसम्भवावेतौ बुद्धिमद्भिर्विभावितौ ॥६५॥

आश्लेषश्चाथ विश्लेषः परिरम्भवियोगयोः ।
आलिङ्गनार्थसम्भूताविमौ विद्वद्भिरीरितौ ॥६६॥

प्रदेहो लेपपर्यायः सन्देहः संशये स्मृतः ।
विदेहः परमो हंस उपलेपार्थसम्भवाः ॥६७॥

उपाधिर्वैकृतं व्याधिश्चाधिर्देहमनोरुजः ।
प्रधिर्नेमिर्विधिरजे साधने नियतौ तथा ॥६८॥
मर्यादावधिरुद्दिष्टः सन्धिर्योगे द्वयोर्मतः ।
परिधिः परिवेषे स्याद्धारणार्थोद्भवाः स्मृताः ॥६९॥
प्रलापोऽनर्थवाक्यं स्यादपलापस्तु निह्नुते ।
संलापोऽन्योन्यवचनमनुलापो मुहुर्मुहुः ॥७०॥
विप्रलापो विरुद्धे स्यात्सुप्रलापस्तु सूनृते ।
आलापो भाषणे प्रोक्तो[1] विलापः परिदेवने॥७१॥
उल्लापो नाम्नि पर्याये भाषणार्थोद्भवा इमे ।
प्राप्तावाप्तौ च लब्धार्थे प्रविष्टे व्याप्त ईरितः ॥७२॥
आप्तः स्वीये समाप्तः स्यात्पूर्णे परिमिते त्वथ ।
पर्याप्त इति निर्दिष्टाः शब्दा व्याप्त्यर्थसम्भवाः ॥७३॥
प्रचयोऽतिशये ख्यातो वृद्धावुपचयो मतः ।
निर्धारणे निश्चयः स्यान्निचयस्तु कदम्बके ॥७४॥
ग्रहणे कुसुमादीनां सम्प्रोक्तोऽवचयो बुधैः ।
उक्तः परिचयोऽभ्यासे चयनार्थोद्भवा अमी ॥७५॥
गतौ प्रवेशो विज्ञेयः स्वप्नः संवेश इत्यपि ।
व्याप्तिः शरीरे दैवी या स आवेश उदाहृतः ॥७६॥
निवेशः शिबिरे ज्ञेयो निर्वेशो भोगसम्भवः ।
उपवेशः स्थितौ प्रोक्त शब्दाः स्युर्वेशनार्थजाः ॥७७॥

---

१. इ —'आलापो विद्वदुदिते' ।

संवेदो ज्ञानपर्यायो निर्वेदः स्वावमाननम् ।
उपवेदस्तु वेदानामायुर्वेदादिषु स्मृतः ॥७८॥
ज्ञानार्थधातुसञ्जाताः प्रसिद्धिं समुपागताः ।
संवाद उभयोः प्रश्नोत्तरे ख्यातो मनीषिभिः ॥७९॥

परिवादापवादौ तु निन्दायां कलहे त्वथ ।
प्रवादश्च विवादश्च दुर्वादो निष्ठुरं वचः ॥८०॥
अभिवादो नमस्कारेऽनुवादः[1] कथने स्मृतः ।
व्यक्तवागर्थसम्भूताः शब्दा वैविध्यमागताः ॥८१॥

प्रभेदश्च विभेदश्च द्वौ स्यातां स्वार्थवाचकौ ।
भवेदुद्भेद उत्पत्तौ सम्भेदः सिन्धुसङ्गमे ॥८२॥
विदारणार्थधातूत्थाः शब्दाः प्रोक्ता विशारदैः ।
औदासीन्ये विरागः स्यादनुरागो रतौ मतः ॥८३॥

उपरागः पुष्पवतोर्ग्रहणे सम्प्रकीर्तितः ।
रञ्जनार्थोद्भवाः शब्दा एत एवोपपादिताः ॥८४॥
प्रश्नेऽनुयोगः संयोगो मिलने सम्प्रकीर्तितः ।
भेदे वियोग उद्योगः प्रोक्तः परिकरे बुधैः ॥८५॥

कल्पे प्रयोगः कर्तव्ये विनियोग उदाहृतः ।
उपयोगस्तु साफल्ये[2] योजनार्थसमुद्भवाः ॥८६॥
प्रचेताः पाणिनि ख्यातो विचेता मोहसङ्कुले ।
संज्ञानार्थोद्भवावेतौ शब्दौ विख्यातिमागतौ ॥८७॥

---

१. इ—'०ववादः' । २. अ, इ—'साकल्ये' ।

शृङ्गारानुभवे ज्ञेयः सम्भोगः पूर्णतार्थकः ।
आभोगः कविभिः प्रोक्त उपभोगस्तु सेवने ॥८८॥
पालनाभ्यवहारार्थधातोः शब्दा इति स्मृताः ।
आरामः स्यादुपवने विरामोऽन्ते प्रकीर्तितः ॥८९॥
रमणीयेऽभिरामः स्यात् क्रीडनार्थोद्भवा अमी ।
प्रच्छन्नं चाप्यन्तर्द्वारे विच्छन्नं स्यात्तिरोहिते ॥९०॥
छादनार्थोद्भवावेतौ गदितौ शब्दवेदिभिः ।
उच्छिन्नं चापि विच्छिन्नं नष्टे चाथ विनिश्चिते ॥९१॥
परिच्छिन्नं बुधैः प्रोक्तं छेदनार्थोद्भवा इति ।
निःसारणे निरसनं शराभ्यास उपासनम् ॥९२॥
आसनं योगभेदे स्याद् व्यसनं दुःखमीरितम् ।
परासनं निहनन अपासनमपि स्मृतम् ॥९३॥
स्थापने न्यसनं ख्यातं क्षेपणार्थोद्भवा अमी ।
प्रलयो विलयश्चेति प्रणाशार्थप्रबोधकौ ॥९४॥
तिरोभावार्थसम्भूता भवने निलयालयौ ।
ग्रासः कुन्ते समासः स्याद् द्वन्द्वतत्पुरुषादिषु ॥९५॥
सङ्क्षेपे च निरासः स्याद् दूरीकरणसंज्ञकः ।
कृष्णद्वैपायने व्यासो विस्तरे च प्रकीर्तितः ॥९६॥
मन्त्राक्षराणामङ्गेषु धारणं न्याससंज्ञकम् ।
अभ्यासो मनसः सक्तावभ्यासः स्यात्परिश्रमे ॥९७॥
उदासस्तु विरक्ते स्यादुपवेशार्थसम्भवाः ।
इच्छाऽपेक्षा तितिक्षा स्यादुपेक्षाऽऽलोकने वरे ॥९८॥

समीक्षा गुणदोषाणां परीक्षा स्याद्विमर्शने ।
मार्गावलोके स्वेष्टस्य प्रतीक्षा समुदाहृता ॥९९॥
दर्शनार्थसमुत्पन्ना इति शब्दा इहोदिताः ।
आस्थानो ज्ञेयमास्थानं प्रस्थानं गमनं मतम् ॥१००॥
चिह्नं संस्थानमुत्थानं स्वस्थानादासनादितः ।
उपस्थानं स्तवः प्रोक्तमधिष्ठानं तु सन्निधिः ॥१०१॥
अवस्थानमवस्था स्यात् सुस्थानं रुचिरे स्थले ।
प्रतिष्ठानं दैवतस्य स्थापनं विधिवत् स्मृतम् ॥१०२॥
अनुष्ठानं प्रयोगः स्याद्धातोर्गतिनिवृत्तिजाः ।
प्रयातः प्रस्थिते ख्यातोऽनुयातोऽनुसृतःस्मृतः ॥१०३॥
प्रतियातोऽरिसाम्मुख्यं गते निगदितो बुधैः ।
निर्यातो निःसृते ज्ञेयोऽपयातो विगते भवेत् ॥१०४॥
शठे वियातः सम्प्रोक्तोऽवयातो विदिते स्मृतः ।
प्रापणार्थसमुत्पन्नाः शब्दा विख्यातिमागताः ॥१०५॥
प्रतापस्तेजसः पुञ्जे नृपदर्पेऽपि सम्मतः ।
सन्तापः संज्वरो ज्ञेय आतपो घर्म उच्यते ॥१०६॥
परितापोपतापौ स्तः सदृशार्थस्य बोधकौ ।
पश्चात्तापोऽनुतापः स्यात्सन्तापार्थोद्भवाअमी॥१०७॥
निपातः सिद्धशब्देषु सम्पातो वृष्टिसंज्ञकः ।
प्रपातो भृगुरादिष्ट उत्पातोऽरिष्टसूचकः ॥१०८॥
व्यतीपातस्तु योगेषु ज्योतिर्विद्भिः प्रकीर्तितः ।
परिपातः प्रवेशः स्यात् पतनार्थसमुत्थिताः ॥१०९॥

प्रसवो जनने स्नानेऽभिषवः परिकीर्तितः ।
आसवो मधुसंज्ञः स्यादुत्सवो शर्मकर्मणि ॥११०॥
आविर्भावार्थसम्भूताः शब्दा उक्ता विशारदैः ।
निपानमुपकूपः स्यादापानं पानगोष्ठिका ॥१११॥

अनुपानं भेषजस्यानुकूलं यत्प्रदीयते ।
पानार्थधातुसञ्जाता इति शब्दाः प्रथां[1] गताः ॥११२॥
निषेधप्रतिषेधौ तु वर्जनार्थप्रवर्तकौ ।
उत्सेध उन्नतत्वे स्याद्वृत्यर्थजनिताः स्मृताः ॥११३॥

लालास्रावे प्रसेकः स्यान्निषेको गर्भधारणः ।
आसेकः सिञ्चने ख्यातोऽभिषेकों राज्यमङ्गले ॥११४॥
परिषेकः प्रोक्षणे तु सेचनार्थसमुद्भवाः ।
प्रक्षेपों मिश्रणं सिद्धे भेषजे भेषजस्य यत् ॥११५॥

आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
अर्थालङ्कार इत्युक्तः प्रवीणैः पूर्वसूरिभिः ॥११६॥
ज्योतिश्चक्रभ्रमे वायुः प्रवहो निवहो गणे ।
कार्यसिद्ध्यवसानो यो यत्नो निर्वाहसंज्ञकः ॥११७॥

धारागतिः प्रवाहः स्यात्संवाहः पादसेवनम् ।
विवाहोद्वाहनामानौ गदितौ पाणिपीडने ॥११८॥
प्रारणार्थसमुद्भूताः शब्दाः प्रोक्ता मनीषिभिः ।
प्रमोदामोदसम्मोदा इति हर्षार्थसम्भवाः ॥११९॥

---

१. इ —'पृथां' ।

विनोदः परिहासे स्यात्प्रणोदः परिमार्जने ।
उत्तरः श्रेष्ठपर्याय आतरस्तरवेतनम् ॥१२०॥

अवतारोऽवतरणं दानं वितरणं स्मृतम् ।
जले प्रतरणं क्लेशान्मुक्तिर्निस्तरणं मतम् ॥१२१॥

पारङ्गते तूत्तरणमासनास्तरणे समे ।
स्थण्डिले परितो दर्भैः परिस्तरणमीरितम् ॥१२२॥

पाषाणे प्रस्तरः प्रोक्तोऽसङ्क्षेपे विस्तरो मतः ।
तरणाच्छादनार्थोत्थाः सुधीभिः सम्प्रकाशिताः ।१२३।

परिप्लवस्तु चाञ्चल्य उपप्लव उपद्रवे ।
विप्लवस्तु विपर्यास आप्लवः स्नानकर्मणि ॥१२४॥

उत्प्लवः कूर्दने ख्यातस्तरणार्थोद्भवा इति ।
सङ्गीतेषु प्रबन्धः स्यादनुबन्धोऽनुवृत्तिकृत् ॥१२५॥

सम्बन्धोऽन्वय उद्दिष्टो निर्बन्धस्तु हठे भवेत् ।
निबन्धो ग्रन्थरचना प्रतिबन्धस्तु रोधकः ॥१२६॥

विबन्धो मलरोधे स्याद् बन्धनार्थसमुद्भवाः ।
जलनिःसारणे ख्यात उद्दोहस्तु जलाशयात् ॥१२७॥

सन्दोहः समुदाये स्यात्पूरणार्थोद्भवा इमौ ।
समीपवर्ति निकटं प्रकटं प्रादुरागतम् ॥१२८॥

सङ्कटं क्लेशपर्यायो विकटं वक्रमुच्यते ।
उत्कटं प्रचुरं ख्यातं शब्दाः शब्दार्थधातुजाः ॥१२९॥

प्रबोधो जागरे ख्यातोऽवबोधो ज्ञानमुच्यते ।
अनुबोधः[1] पत्रलेखाऽमन्त्रे सम्बोधनं स्मृतम् ॥१३०॥
बोधनार्थसमुत्पन्नाः शब्दाः प्रख्यातिमागताः ।
प्रकीर्णमवकीर्णं च प्रसृते च प्रसारिते ॥१३१॥
सङ्कीर्णं स्यात्सङ्कुचित[2] आकीर्णं व्याप्तमुच्यते ।
शब्दा विकीर्णार्थोत्थाश्च विनिर्णीताः कवीश्वरैः ।१३२।
अभिघातस्तु शस्त्राद्यैः प्रहारस्तु उपस्थितः ।
प्रोक्तो निर्घात उत्पातः शब्दा हिंसार्थसम्भवाः ॥१३३॥
हत्यायामपघातः स्यात्सङ्घातो गणवाचकः ।
उक्तः प्रकर्ष आधिक्येऽपकर्षोत्कर्षसंज्ञकौ ॥१३४॥
अनुत्तमोत्तमत्वे च निष्कर्षः सारसम्मतः ।
अनुकर्षो दार्वधःस्थं स्यन्दनस्य प्रकीर्तितम् ॥१३५॥
प्रकृष्टमुदितप्रायमुत्कृष्टं श्रेष्ठवाचकम् ।
आकृष्टं कर्षितं प्राहुर्निकृष्टं नीचमुच्यते ॥१३६॥

---

१. यहाँ अनुबोध का अर्थ पत्रलेखा दिया गया है। यह अर्थ ठीक नहीं। अनुबोध का अर्थ है—निकली हुई गन्ध को पुनः लाना। अमरकोश में इसका पर्याय प्रबोधन दिया गया है—
'.....प्रबोधनम्। अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे ॥' २/६/१२२
ऐसा लगता है कि कोशकार ने भ्रमवश अमरकोश के उपर्युक्त श्लोक के तृतीय चरण को उसी प्रकार रख दिया है। पत्रलेखा और पत्राङ्गुलि समार्थक हैं। इनका अर्थ है—कस्तूरी, चन्दन आदि से कपोल, स्तन आदि पर फूल, पत्तियों आदि की आकृतियाँ बनाना।

२. अ, इ—'सङ्कुचिते'।

विलेखनार्थसम्भूता अपकृष्टं तथैव च ।
विदेशगमने विज्ञैः प्रवासः सम्प्रकीर्तितः ॥१३७॥
ख्यातो निवासः संवास आवासो मन्दिरं स्मृतम् ।
अधिवासो दैवतस्य पूजनात्प्रागुदीरितः ॥१३८॥
विवासोद्वासनामानावुक्तावुच्चाटने बुधैः ।
उपवासो व्रते प्रोक्तो वसधातोः समुत्थिताः ॥१३९॥
उक्तः प्रारम्भ आरम्भः कार्यादिः परिरम्भकः ।
आश्लेषे वेगबाहुल्ये संरम्भः सम्प्रकीर्तितः ॥१४०॥
वेगार्थप्रकृतेर्जाताः शब्दा धीरैः समीरिताः ।
नमस्कृतिः प्रणामोऽथ परिणामोऽन्तवाचकः ॥१४१॥
विनामो वङ्क्षणानाहः प्रणतो नम्रसंज्ञकः ।
ज्ञेयं परिणतं पक्वमुच्चमुन्नतमुच्यते ॥१४२॥
सम्यगीषन्नते शब्दौ भवेतां सन्नतानतौ ।
प्राप्ते तूपनतं धातोः स्तुत्यर्थात्समुपस्थिताः ॥१४३॥
समूहव्यूहनामानौ व्रजेऽथो वस्तिकर्मणि ।
निरूहो रूढिमायातो वितर्कार्थसमुद्भवाः ॥१४४॥
प्रभावः कान्तिसंस्थाने प्रतिभावो मतिक्रमे[1] ।
दीप्त्यर्थसम्भवाः शब्दाः प्रथिता विदुषां मते ॥१४५॥
गोत्राङ्गे प्रवरः श्रेष्ठे बिले विवरमुच्यते ।
सङ्गोपने संवरणं व्याख्या विवरणं स्मृतम् ॥१४६॥
वेष्टने स्यादावरणं वासः प्रावरणं मतम् ।
उत्तरीये तथैव 'स्यात्प्रावारः सूरिसम्मतः ॥१४७॥

१. अ—'प्रतिभावमतिक्रमे' ।

कुटुम्बं परिवारः स्यात्सम्मते शब्दशास्त्रिणाम् ।
संवारश्च विवारश्च प्रयत्नावक्षरेष्विमौ ॥१४८॥
दुर्वारो दुर्निवार्ये च शब्दाः संवरणार्थजाः ।
सन्नाहो वर्मणि प्रोक्त उपनाहो निबन्धने ॥१४९॥
आनाहो व्याधिभेदे स्यात्परिणाहो विशालता ।
बन्धनार्थभवाः शब्दा नानार्थद्योतकाः स्मृताः ॥१५०॥
निरोधो बन्धने वैरे विरोधः समुदाहृतः ।
अवरोधस्तु शुद्धान्ते शब्दा आवरणार्थजाः ॥१५१॥
व्याख्या विवरणेऽभिख्याऽऽभायामाख्या तु नामनि ।
गणनायां तु सङ्ख्या स्यात्कथनार्थसमुद्भवाः ॥१५२॥
सङ्कल्पश्च विकल्पश्च मनोधर्माविदाहृतौ ।
अनिश्चयो विकल्पः स्यात्सङ्कल्पो निश्चयात्मकः।१५३।
अनुकल्पोऽधमे कल्प आकल्पो वेष उच्यते ।
सामर्थ्यार्थसमुत्पन्नाः कृतिभिः प्रतिपादिताः ॥१५४॥
प्रयाणमाहुः प्रस्थानेऽपयानं स्यात्पलायनम् ।
निर्याणं मरणे चाथ पक्षिणोऽपाङ्गयोरपि ॥१५५॥
अभियानं रणे धैर्यं प्रापणार्थसमुद्भवाः ।
प्रश्रयो विनये ख्यातः सहाये संश्रयाश्रयौ ॥१५६॥
व्यपाश्रयस्तु दोषाणामभावे सम्प्रणोदितः ।
सेवार्थधातुसञ्जाताः प्रणीताः पण्डितैरिति ॥१५७॥
प्रहितं प्रेषिते प्रोक्तं संहितं सन्धितं समम् ।
निक्षेपे निहितं ज्ञेयमाहितं तद्वदेव हि ॥१५८॥

गदितं विहितं कृत्ये पिहितापिहिते पुनः ।
आच्छादने प्रकथनेऽभिहितं सम्प्रकीर्तितम् ॥१५९॥
सन्वृते परिधानीये वस्त्रे परिहितं स्मृतम् ।
उक्तं चोपहितं प्राज्ञैरुपकारे पुरातनैः ॥१६०॥
अपकारे त्वपहितं धातोः सन्धारणार्थजाः ।
प्रफुल्लोत्फुल्लसम्फुल्ला विकासार्थभवाः स्मृताः ।१६१।
प्राणोदानसमानाश्चापानव्यानौ च वायवः ।
देहिनां देह[1]कृत्यार्थाः सातत्यगमनार्थजाः ॥१६२॥
प्राच्यवाची प्रतीची चार्थोदीची च गतार्थजाः ।
शक्रान्तकजलेशैलबिलानां क्रमशो दिशः ॥१६३॥
वाणी तरङ्गिणी देवी मच्छब्दार्थोर्मिमालिनी ।
अपरा चातलस्पर्शा ह्यतलाशां[2] समाहृत ॥१६४॥
गुणाश्च वेदाश्च ततो महेभाः
कलानिधिश्चेति च वत्सराङ्काः ।
कृष्णः शुचिः श्रीक्षितिजस्तदानीं[3]
पूर्तिं प्रलेभे ह्युपसर्गवर्गः ॥१६५॥

इति श्रीमहादेवभट्टाचार्यविरचित उपसर्गवर्गः सम्पूर्णः

१. अ, इ—'देहि०' । २. अ—'०तलस्पर्शोऽतलाशां' ।
३. इ—'श्रीक्षितिजलस्तदानीं' ।

शब्द-सूची

टि०—शब्द के आगे पहली पृष्ठ-संख्या और दूसरी श्लोक-संख्या है।

अ

अतिक्रमः	६, ५२	उल्लङ्घन
अतिचारः	५, ३८	ग्रह का एक राशि पर भोगफल समाप्त हुए बिना दूसरी राशि पर जाना।
अतिशयः	५, ४१	अधिकता
अतिसारः	३, २५	दस्त का एक रोग
अत्ययः	४, ३०	नाश
अधिकारः	२, १०	योग्यता
अधिवासः	१५; १३८	पूजने के पहले किसी स्थान पर प्रतिमा की प्रतिष्ठा।
अधिष्ठानम्	११, १०१	समीप में खड़ा होना
अधीतः	४, ३४	भली भाँति पढ़ा हुआ
अध्यासः	१०, ९७	मिथ्या-ज्ञान
अनुकर्षः	१४, १३५	रथ के नीचे की लकड़ी
अनुकल्पः	१६, १५४	गौणकल्प, आवश्यकता के समय मुख्य वस्तु के स्थान पर प्रयोग करने के लिए अन्य विकल्प की कल्पना।
अनुकारः	२, १०	अनुकरण करना

अनुक्रमः	६, ५०	क्रम
अनुग्रहः	५, ४४	कृपा
अनुतापः	११, १०७	पश्चात्ताप
अनुनयः	३, २२	सान्त्वना
अनुपानम्	१२, ११२	वह पदार्थ जो ओषधि के साथ या उसके बाद खाया जाय।
अनुबन्धः	१३, १२५	अविच्छिन्नता
अनुबोधः	१४, १३०	निकली हुई गंन्ध को पुनः लाना (दे० पाद-टिप्पणी, पृ० १४)।
अनुभवः	२, १४	साक्षात्कार से प्राप्त ज्ञान
अनुमानम्	२, १६	तर्क
अनुयातः	११, १०३	अनसृत, अनुसरण किया हुआ
अनुयोगः	९, ८५	प्रश्न
अनुरागः	९, ८३	प्रेम
अनुलापः	८, ७०	बार-बार कहना
अनुवादः	९, ८१	कथन
अनुशयः	५, ४१	पश्चात्ताप
अनुषङ्गः	४, ३६	सङ्गति, मेल
अनुष्ठानम्	११, १०३	प्रयोग, शास्त्रोक्त कार्य का नियम पूर्वक सम्पादन।
अनुसरः	३, २६	अनुकरण करने वाला
अन्वयः	३, २८	वंश
अन्वितः	४, ३२	युक्त
अपकर्षः	१४, १३४	हीनता

अपकारः	२, १०	अहित, हानि
अपकृष्टम्	१५, १३७	नीच
अपक्रमः	६, ५१	क्रम का अभाव, उलट-पुलट
अपगमः	७, ५९	समाप्ति, राहित्य
अपघातः	१४, १३४	हत्या
अपचारः	५, ३८	लोप, अभाव
अपदेशः	३, १९	बहाना
अपनयः	३, २१	अनीति, बुरी नीति
अपमानः	२, १६	तिरस्कार
अपयातः	११, १०४	गया हुआ
अपयानम्	१६, १५५	पलायन, भागना
अपलापः	८, ७०	छिपाना
अपवादः	९, ८०	निन्दा
अपसारः	३, २५	दूर जाना
अपहितम्	१७, १६१	अपकार
अपादानम्	६, ५७	पञ्चमी
अपानः	१७, १६२	शरीर में रहने वाली वायु (यह गुदा में रहती है)।
अपायः	३, २७	नाश
अपासनम्	१०, ९३	हत्या
अपिधानम्	१, ५	आच्छादन, ढकना
अपिहितम्	१७, १५९	आच्छादित, ढका हुआ
अपेक्षा	१०, ९८	इच्छा, आकांक्षा
अपेतः	४, ३२	तिरोहित, गया हुआ

अप्ययः	४, ३०	नाश
अभिख्या	१६, १५२	शोभा, आभा, सौन्दर्य
अभिगमः	७, ६०	सम्मुख गमन
अभिघातः	१४, १३३	शस्त्र आदि से किया गया प्रहार
अभिचारः	४, ३७	मारण आदि के लिए किया जाने वाला अनुष्ठान।
अभिधानम्	१, ६	नाम
अभिनयः	३, २२	नृत्य
अभिपन्नः	७, ६४	प्राप्त
अभिभवः	२, १५	तिरस्कार
अभिमानः	२, १७	गर्व
अभियानम्	१६, १५६	युद्ध में धैर्य
अभिरामः	१०, ९०	सुन्दर
अभिलाषः	६, ५४	मनोरथ
अभिवादः	९, ८१	नमस्कार
अभिषङ्गः	४, ३६	पराजय
अभिषवः	१२, ११०	स्नान
अभिषेकः	१२, ११४	राजतिलक
अभिसारः	३, २४	नायिका का नायक से मिलने के लिए जाना।
अभिहितम्	१७, १५९	कहा हुआ
अभ्यासः	१०, ९७	परिश्रम
अवकाशः	६, ५५	शून्य स्थान
अवकीर्णम्	१४, १३१	फैलाया हुआ

अवगमः	७, ६०	बोध, ज्ञान
अवग्रहः	५, ४३	सूखा; हाथी का माथा
अवचयः	८, ७५	फूल आदि को चुनना
अवतारः	१३, १२१	उतरना
अवधिः	८, ६९	सीमा
अवबोधः	१४, १३०	ज्ञान
अवमानः	२, १६	तिरस्कार
अवयातः	११, १०५	गया हुआ
अवरोधः	१६, १५१	अन्तःपुर
अवसन्नः	६, ४९	क्षीण
अवसरः	३, २६	समय
अवसादः	६, ४८	क्षीणता
अवस्थानम्	११, १०२	अवस्था
अवाची	१७; १६३	दक्षिण दिशा
अवाप्तः	८, ७२	प्राप्त

आ

आकरः	२, १२	खान
आकल्पः	१६, १५४	वेष
आकारः	२, ९	स्वरूप
आकाशः	६, ५७	गगन
आकीर्णम्	१४, १३२	व्याप्त
आकृष्टम्	१४, १३६	खींचा हुआ
आक्रमः	६, ५२	परिवेष्टन, घेरना

आक्षेपः	१२, ११६	स्वयं कही हुई बात का विचार करके प्रतिषेध करना, यह एक अर्थालङ्कार है।
आख्या	१६, १५२	नाम
आगमः	७, ५९	शास्त्र
आग्रहः	५, ४३	हठ
आचारः	५, ३९	श्रुतियों और स्मृतियों में प्रतिपादित धर्म।
आतपः	११, १०६	धूप
आतरः	१३, १२०	नाव से उतरने के लिए या पुल से पार होने के लिए दिया जानेवाला द्रव्य, उतराई।
आदानम्	७, ५८	ग्रहण, लेना
आदेशः	३, २०	आज्ञा
आधानम्	१, ७	स्थापन, रखना
आधिः	८, ६८	मानसिक रोग
आनतः	१५, १४३	थोड़ा झुका हुआ
आनाहः	१६, १५०	कोष्ठ-बद्धता
आपन्नः	७, ६३	विपत्ति-ग्रस्त
आपानम्	१२, १११	मद्यपान-गोष्ठी
आप्तः	८, ७३	सम्बन्धी, अपना आदमी
आप्लवः	१३, १२४	स्नान
आभोगः	१०, ८८	पूर्णता
आमोदः	१२, ११९	हर्ष

आयः	३, २७	द्रव्य-लाभ
आरम्भः	१५, १४०	कार्य का आदि
आरामः	१०, ८६	उपवन
आलयः	१०, ९५	घर
आलापः	८, ७१	भाषण
आवरणम्	१५, १४७	वेष्टन, ढकना
आवासः	१५, १३८	घर
आवेशः	८, ७६	प्रेत का शरीर पर अधिकार होना
आशयः	५, ४०	अभिप्राय; कोष्ठ
आश्रयः	१६, १५६	सहारा
आश्लेषः	७, ६६	आलिङ्गन
आसनम्	१०, ९३	बैठने की विशेष विधि
आसवः	१२, ११०	मद्य
आसारः	३, २५	मूसलधार वर्षा
आसेकः	१२, ११४	सेचन, सींचना
आस्तरणम्	१३, १२२	आसन
आस्थानी	११, १००	सभा-भवन
आहारः	१, ७	भोजन
आहितम्	१६, १५८	जमा किया हुआ

उ

उच्चारः	४, ३७	मूत्र (अन्य कोशों में उच्चार का विष्ठा अर्थ मिलता है)।

उच्छिन्नम्	१०, ९१	नष्ट
उत्कटम्	१३, १२९	प्रचुर
उत्करः	२, १२	समूह
उत्कर्षः	१४, १३४	श्रेष्ठता
उत्कृष्टम्	१४, १३६	श्रेष्ठ
उत्क्रमः	६, ५२	मरण
उत्तरः	१३, १२०	श्रेष्ठ, उत्कृष्ट
उत्तरणम्	१३, १२२	उतरना, पार जाना
उत्थानम्	११, १०१	उठना
उत्पन्नः	७, ६३	पैदा हुआ
उत्पातः	११, १०८	अरिष्ट
उत्प्लवः	१३, १२५	कुदान
उत्फुल्लः	१७, १६१	विकसित, खिला हुआ
उत्सङ्गः	४, ३५	गोद
उत्सर्गः	५, ४६	त्याग, छोड़ना
उत्सवः	१२, ११०	माङ्गलिक कार्य
उत्सेधः	१२, ११३	ऊँचाई
उदयः	४, ३१	प्रकट होना
उदानः	१७, १६२	शरीर में रहने वाली वायु (यह कण्ठ में रहती है)।
उदासः	१०, ९८	विरक्त
उदितः	४, ३३	दीप्त; प्रकट
उदीची	१७, १६३	उत्तर दिशा
उद्गमः	७, ६१	आविर्भाव

उद्देशः	३, २०	अभिप्राय
उद्दोहः	१३, १२७	जलाशय से जल निकालना, उदहना
उद्धारः	२, ८	डूबे हुए को निकालना
उद्भवः	२, १४	अंकुर निकलने की अवस्था
उद्भेदः	९, ८२	उत्पत्ति
उद्योगः	९, ८५	आरम्भ, उपक्रम
उद्वासः	१५, १३९	निर्वासन, देश-निकाला
उद्वाहः	१२, ११८	विवाह
उन्नतम्	१५, १४२	उच्च
उन्मानम्	२, १७	तौल विशेष
उपकारः	२, १०	हित, लाभ
उपक्रमः	६, ५३	आरम्भ
उपगमः	७, ६१	प्राप्ति
उपग्रहः	५, ४२	बन्धन, कैद
उपग्रहः	५, ४४	केतु आदि की भाँति छोटा ग्रह
उपचयः	८, ७४	वृद्धि
उपचारः	४, ३७	पूजन; विधान
उपतापः	११, १०७	क्लेश, पीड़ा
उपदेशः	३, २०	गुरु का वचन
उपधानम्	१, ४	तकिया
उपनतम्	१५, १४३	प्राप्त
उपनयः	३, २३	उपनयन संस्कार
उपनाहः	१६, १४९	घाव पर लगाया जाने वाला मलहम
उपपन्नः	७, ६४	उपलब्ध, प्राप्त

उपप्लवः	१३, १२४	उपद्रव
उपभोगः	१०, ८८	स्त्री के साथ भोग करना
उपमानम्	२, १८	समता
उपयोगः	६, ८६	सफलता
उपरागः	६, ८४	सूर्य और चन्द्र का ग्रहण
उपवासः	१५, १३६	व्रत
उपवेदः	६, ७८	आयुर्वेद आदि उपवेद
उपवेशः	८, ७७	स्थिति, बैठना
उपशयः	५, ४१	रोगों के स्वरूप को जानने का हेतु, निदान।
उपसर्गः	५, ४७	विपत्ति; प्र आदि उपसर्ग
उपस्थानम्	११, १०१	स्तुति
उपहारः	२, ६	भेंट
उपहितम्	१७, १६०	उपकार
उपाधिः	८, ६८	विकार
उपायः	४, २६	चिकित्सा
उपासनम्	१०, ६२	बाण चलाने का अभ्यास
उपेक्षा	१०, ६८	सहन करने की शक्ति
उपेतः	४, ३४	प्राप्त
उल्लापः	८, ७२	शब्द
उल्लासः	६, ५४	मोद, आनन्द

द

दुरितम्	४, ३२	निर्धनता

दुर्गमः	७, ६१	अगम्य, न जाने योग्य
दुर्वादः	९, ८०	निष्ठुर वचन
दुर्वारः	१६, १४९	दुर्निवार्य

न

निःसङ्गः	४, ३५	आसक्ति-रहित
निःसारः	३, २५	सार-रहित
निकटम्	१३, १२८	समीपवर्ती
निकरः	२, १२	समूह
निकृष्टम्	१४, १३६	नीच
निगमः	७, ५९	वेद
निग्रहः	५, ४४	घात
निचयः	८, ७४	समूह
निदानम्	७, ५८	कारण
निदेशः	३, १९	आज्ञा
निधानम्	१, ६	सुन्दर वस्तुओं से भरा हुआ कोश
निपातः	११, १०८	सिद्ध शब्द
निपानम्	१२, १११	कूएँ के पास का वह हौद जिसमें पशुओं के पीने के लिए पानी भरा हो।
निबन्धः	१३, १२६	ग्रन्थ-रचना
निरयः	३, २८	नरक
निरसनम्	१०, ९२	फेंकना
निरासः	१०, ९५	दूर करना
निरूहः	१५, १४४	वस्ति-क्रिया

निरोधः	१६, १५१	बन्धन
निर्गमः	७, ६०	गमन, प्रस्थान
निर्घातः	१४, १३३	उत्पात
निर्णयः	३, २२	निर्धारण
निर्देशः	३, २०	कथन, कहना
निर्बन्धः	१३, १२६	हठ
निर्माणम्	२, १७	रचना
निर्याणम्	१६, १५५	मृत्यु; हाथी की आँख का बाहरी कोना
निर्यातः	११, १०४	निकला हुआ
निर्वाहः	१२, ११७	वह यत्न जो कार्य-सिद्धि तक चले
निर्वेदः	९, ७८	स्वाभिमान, मन में अपने प्रति होने वाली ग्लानि ।
निर्वेशः	८, ७७	भोग
निलयः	१०, ९५	घर
निवहः	१२, ११७	समूह
निवासः	१५, १३८	घर
निवेशः	८, ७७	शिबिर
निश्चयः	८, ७४	निर्धारण
निषङ्गः	४, ३५	तरकस
निषण्णः	६, ४९	स्थित
निषादः	६, ४८	भील
निषेकः	१२, १४४	गर्भ धारण करना
निषेधः	१२, ११३	वर्जन, रोक
निष्कर्षः	१४, १३५	सार

निष्क्रमः	६, ५२	निर्गम, निकलना
निष्पन्नः	७, ६३	पैदा हुआ
निसर्गः	५, ४६	स्वभाव
निस्तरणम्	१३, १२१	क्लेश से छुटकारा
निहितम्	१६, १५८	जमा किया हुआ
नीकाशः	७, ५६	समान
नीतम्	४, ३३	पहुँचाया हुआ, प्राप्त कराया हुआ
न्यसनम्	१०, ९४	स्थापन, रखना
न्यासः	१०, ९७	मन्त्र के अक्षरों को अङ्गों में धारण करना।

प

पराक्रमः	६, ५१	पौरुष
पराजयः	७, ६५	हार
पराभवः	२, १३	विनाश, पराजय
परासनम्	१०, ९३	हत्या
परिकरः	२, १३	अनुचर-वर्ग
परिक्रमः	६, ५३	प्रदक्षिणा
परिग्रहः	५, ४५	भार्या
परिचयः	८, ७५	अभ्यास
परिचारः	४, ३७	नौकर, सेवक
परिच्छिन्नम्	१०, ९२	निश्चित किया हुआ
परिणतम्	१५, १४२	पका हुआ
परिणयः	३, २३	विवाह

परिणामः	१५, १४१	अन्त
परिणाहः	१६, १५०	विशालता
परितापः	११, १०७	क्लेश, पीड़ा
परिधानम्	१, ६	अधोवस्त्र
परिधिः	८, ६६	घेरा
परिपातः	११, १०६	प्रवेश
परिप्लवः	१३, १२४	चञ्चलता
परिभवः	२, १४	अनादर
परिमाणम्	२, १५	शक्ति (बल) की नाप
परिरम्भकः	१५, १४०	आलिङ्गन
परिलासः	६, ५४	मण्डन
परिवादः	६, ८०	निन्दा
परिवारः	१६, १४८	कुटुम्ब
परिषेकः	१२, ११५	छिड़कना
परिस्तरणम्	१३, १२२	कुश आदि को भूमि पर बिछाना
परिहारः	२, ८	परित्याग
परिहितम्	१७, १६०	धारण किया हुआ वस्त्र
परीक्षा	११, ६६	विवेचन, विमर्श
परीतः	४, ३४	युक्त
परेतः	४, ३१	मरा हुआ
पर्याप्तः	८, ७३	उचित परिमाण में, परिमित
पर्यायः	४, ३०	समानार्थक शब्द
पिधानम्	१, ५	आच्छादन, ढकना
पिहितम्	१७, १५६	आच्छादित, ढका हुआ

प्रकटम्	१३, १२८	प्रत्यक्ष
प्रकरः	२, १२	पुञ्ज
प्रकर्षः	१४, १३४	अधिकता
प्रकारः	२, ९	विधि
प्रकाशः	६, ५५	चमक
प्रकीर्णम्	१४, १३१	फैलाया हुआ
प्रकृष्टम्	१४, १३६	लम्बा
प्रक्रमः	६, ५०	क्रम
प्रक्षेपः	१२, ११५	सिद्ध औषधि में ऊपर से दूसरा पदार्थ मिलाना ।
प्रग्रहः	५, ४२	बन्धन, कैद
प्रचयः	८, ७४	अति
प्रचारः	५, ३८	प्रसिद्धि, चलन
प्रचेताः	९, ८७	वरुण
प्रच्छन्नम्	१०, ९०	तिरोहित; अन्तर्द्वार, चोर दरवाजा
प्रणतः	१५, १४२	नम्र
प्रणयः	३,२१	प्रेम
प्रणामः	१५, १४१	नमस्कार
प्रणोदः	१३, १२०	परिमार्जन, साफ करना
प्रतरणम्	१३, १२१	तैरना
प्रतापः	११, १०६	तेज; राजा का तेज
प्रतिग्रहः	५, ४५	दान का स्वीकरण
प्रतिपन्नः	७, ६४	प्राप्त
प्रतिबन्धः	१३, १२६	रुकावट

प्रतिभावः	१५, १४५	समान चित्तवृत्ति
प्रतिमानम्	२, १८	प्रतिमा
प्रतियातः	११, १०३	शत्रु के सम्मुख गया हुआ
प्रतिषेधः	१२, ११३	निषेध
प्रतिष्ठानम्	११, १०२	देवता की विधिवत् स्थापना
प्रतिसर्गः	५, ४७	सृष्टि-विशेष
प्रतीकाशः	६, ५६	समान
प्रतीक्षा	११, ९९	अपने इष्ट के आने का मार्ग देखना
प्रतीची	१७, १६३	पश्चिम दिशा
प्रतीतः	४, ३३	विश्वस्त
प्रत्ययः	४, २९	विश्वास
प्रदेहः	७, ६७	लेप
प्रधानम्	१, ५	प्रकृति; मन्त्री; श्रेष्ठ
प्रधिः	८, ६८	नेमि, पहिये का घेरा
प्रपन्नः	७, ६२	शरणागत
प्रपातः	११, १०८	पहाड़ की ढाल
प्रफुल्लः	१७, १६१	विकसित, खिला हुआ
प्रबन्धः	१३, १२५	संगत वचन
प्रबोधः	१४, १३०	जागरण
प्रभवः	२, १३	उत्पत्ति
प्रभावः	१५, १४५	आभा, चमक
प्रभेदः	९, ८२	भेद
प्रमाणम्	२, १५	मान, नाप
प्रमोदः	१२, ११९	हर्ष

प्रयाणम्	१६, १५५	प्रस्थान
प्रयातः	११, १०३	गया हुआ
प्रयोगः	९, ८६	चिकित्सा
प्रलयः	१०, ९४	नाश
प्रलापः	८, ७०	अनर्थ वचन
प्रवरः	१५, १४६	गोत्राङ्ग; श्रेष्ठ
प्रवहः	१२, ११७	पवन के सात मार्गों में से एक
प्रवादः	९, ८०	कलह
प्रवासः	१२, ११७	विदेश-गमन
प्रवाहः	१२, ११८	बहाव
प्रवेशः	८, ७६	गति
प्रश्रयः	१६, १५६	विनय
प्रसङ्गः	४, ३५	प्रस्ताव
प्रसन्नः	६, ४९	प्रमुदित
प्रसरः	३, २६	विस्तार
प्रसवः	१२, ११०	जन्म, उत्पत्ति
प्रसादः	६, ४८	परम प्रसन्नता
प्रसारः	३, २४	विस्तार
प्रसेकः	१२, ११४	लार का टपकना
प्रस्तरः	१३, १२३	पत्थर
प्रस्थानम्	११, १००	गमन
प्रहारः	१, ७	ताड़न
प्रहितम्	१६, १५८	प्रेषित
प्राकारः	२, ११	घेरा, चहारदीवारी

प्राची	१७, १६३	पूर्व दिशा
प्राणः	१७, १६२	शरीर में रहने वाली वायु (यह हृदय में रहती है) ।
प्रादेशः	३, १६	फैलाए हुए अँगूठे और तर्जनी के बीच का मान ।
प्राप्तः	८, ७२	पाया हुआ
प्रारम्भः	१५, १४०	आरम्भ
प्रावरणम्	१५, १४७	वस्त्र-विशेष
प्रावारः	१५, १४७	उत्तरीय
प्रासः	१०, ६५	एक प्रकार का भाला
प्रेतः	४, ३१	मरा हुआ

व

विकटम्	१३, १२६	वक्र
विकल्पः	१६, १५३	अनिश्चय
विकारः	२, ११	स्वरूप और स्वभाव में परिवर्तन
विकाशः	६, ५६	मानसिक उल्लास
विक्रमः	६, ५१	पौरुष
विगमः	७, ५६	समाप्ति, राहित्य
विग्रहः	५, ४४	वैर; शरीर
विचारः	५, ३६	विमर्श
विचेताः	६, ८७	मूढ़, मोहयुक्त
विच्छन्नम्	१०, ६०	तिरोहित
विच्छिन्नम्	१०, ६१	नष्ट
विजयः	७, ६५	जय

वितरणम्	१३, १२१	दान
विदेहः	८, ६८	परमहंस
विधानकम्	१, ६	कार्य का सम्पादन, कृत्य
विधिः	८, ६८	ब्रह्मा; साधन; भाग्य
विनयः	३, २२	नम्रता
विनामः	१५, १४२	ऊरु के जोड़ का झुकना
विनियोगः	९, ८६	कर्तव्य
विनोदः	१३, १२०	परिहास
विपन्नः	७, ६३	विपत्ति-ग्रस्त
विप्रलापः	८, ७१	विरुद्ध कथन
विप्लवः	१३, १२४	विरुद्धता, उलट-पुलट
विबन्धः	१३, १२७	मलावरोध
विभवः	२, १४	शक्ति, पराक्रम
विभेदः	९, ८२	भेद
विमानम्	२, १७	आकाश में चलने वाला यान
वियातः	११, १०५	शठ, दुष्ट
वियोगः	९, ८५	विरह, अलगाव
विरागः	९, ८३	उदासीनता
विरामः	१०, ८९	अन्त
विरोधः	१६, १५१	वैर
विलयः	१०, ९४	प्रलय
विलापः	८, ७१	क्रन्दन, रुदन
विलासः	६, ५४	क्रीड़ा
विवरणम्	१५, १४६	व्याख्या

विवरम्	१५, १४६	बिल
विवादः	९, ८०	कलह
विवारः	१६, १४८	ग्यारह बाह्य प्रयत्नों में से एक
विवासः	१५, १३९	निर्वासन, देश-निकाला
विवाहः	१२, ११८	पाणिग्रहण
विश्लेषः	७, ६६	वियोग
विषण्णः	६, ४९	उदास, दुःखित
विषादः	६, ४८	दुःख, शोक
विसरः	३, २६	समूह
विसर्गः	५, ४६	प्रलय
विस्तरः	१३, १२३	विस्तार
विहारः	२, ८	क्रीड़ा
विहितम्	१७, १५९	कृत्य, विधान
वीतम्	४, ३२	लड़ाई के काम में अयोग्य हाथी या घोड़ा।
व्यतीतः	४, ३३	गया हुआ
व्यतीपातः	११, १०९	ज्योतिश्शास्त्र में प्रसिद्ध योग-विशेष
व्यपाश्रयः	१६, १५७	दोषों का अभाव
व्ययः	३, २७	नाश
व्यसनम्	१०, ९३	दुःख
व्याख्या	१६, १५२	टीका, विवेचन
व्याधिः	८, ६८	शारीरिक रोग
व्यानः	१७, १६२	शरीरस्थ वायु (यह पूरे शरीर में रहती है)।

व्याप्तः	८, ७२	प्रविष्ट, फैला हुआ
व्यासः	१०, ९६	कृष्णद्वैपायन; विस्तार
व्यूहः	१५, १४४	समूह

स

संयोगः	९, ८५	मिलन
संरम्भः	१५, १४०	वेग की बहुलता
संलापः	८, ७०	परस्पर वार्तालाप
संवरणम्	१५, १४६	गोपन, छिपाना
संवादः	९, ७९	बातचीत
संवारः	१६, १४८	ग्यारह बाह्य प्रयत्नों में से एक
संवासः	१५, १३८	घर
संवाहः	१२, ११८	पैर दबाना
संवेदः	९, ७८	ज्ञान
संवेशः	८, ७६	स्वप्न
संशयः	५, ४०	सन्देह
संश्रयः	१६, १५६	आश्रय, सहारा
संसर्गः	५, ४६	स्पर्श
संसारः	३, २४	जन्म और मरण का चक्र
संस्थानम्	११, १०१	चिह्न
संहारः	२, ८	कर्षण, खींचना
संहितम्	१६, १५८	संयुक्त, एकत्र किया हुआ
सङ्कटम्	१३, १२९	क्लेश
सङ्करः	२, १२	दो भिन्न जातियों या वर्णों के पिता और माता के संयोग से उत्पन्न सन्तान।

सङ्कल्पः	१६, १५३	निश्चय
सङ्काशः	६, ५६	समान
सङ्कीर्णम्	१४, १३२	सङ्कुचित
सङ्क्रमः	६, ५०	ग्रह का एक राशि से निकलकर दूसरी राशि में जाना।
सङ्ख्या	१६, १५२	गणना, गिनती
सङ्गमः	७, ५९	मिलन
सङ्ग्रहः	५, ४३	सञ्चय
सङ्घातः	१४, १३४	समूह
सञ्चारः	५, ३९	सम्मोहन ('संचारः श्रवणदर्शनाभ्यां परमोहनम्'—आप्टे के कोश में उद्धृत)।
सन्तापः	११, १०६	उष्णता, ताप, जलन
सन्देशः	३, १९	संदेशा
सन्देहः	७, ६७	संशय
सन्दोहः	१३, १२८	समुदाय
सन्धानम्	१, ४	संयोग; आसव आदि बनाने की क्रिया
सन्धिः	८, ६९	दो का योग, मेल
सन्नतः	१५, १४३	पूर्णतः झुका हुआ
सन्नाहः	१६, १४९	कवच
समयः	३, २८	काल; संकेत (शर्त)
समवायः	४, ३०	समूह
समाधानम्	१, ४	मन की शान्ति, चित्त की एकाग्रता
समानः	१७, १६२	शरीरस्थ वायु (यह नाभि-मण्डल में रहती है)।

समाप्तः	८, ७३	पूर्ण
समासः	१०, ९५	द्वन्द्व, तत्पुरुष आदि समास; सङ्क्षेप।
समीक्षा	११, ९९	गुण-दोष-विवेचन
समुदयः	४, ३०	समूह
समुदायः	४, ३०	समूह
समूहः	१५, १४४	झुण्ड
समेतः	४, ३२	युक्त
सम्पन्नः	७, ६२	धनी
सम्पातः	११, १०८	वृष्टि
सम्प्रदानम्	६, ५७	चतुर्थी
सम्फुल्लः	१७, १६१	विकसित
सम्बन्धः	१३, १२६	अन्वय, रिश्ता
सम्बोधनम्	१४, १३०	आमन्त्रण
सम्भवः	२, १४	उपस्थिति
सम्भेदः	९, ८२	नदियों का सङ्गम
सम्भोगः	१०, ८८	उपभोग, मैथुन
सम्मानः	२, १६	सत्कार
सम्मोदः	१२, ११९	हर्ष
सुगमः	७, ६१	जाने योग्य
सुप्रलापः	८, ७१	सत्य-प्रिय वचन
सुस्थानम्	११, १०२	सुन्दर स्थल

——